# Vyasakritam Shatarudriyam

# व्यासकृतं शतरुद्रीयं

## Document Information

Text title : Vyasakritam Shatarudriyam

File name : vyAsakRRitaMshatarudrIyaM.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | droNaparva |

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2026

*sanskritdocuments.org*

# व्यासकृतं शतरुद्रीयं

(महाभारते द्रोणपर्वणि)
स वै रुद्रः स च शिवः सोऽग्निः शर्वः स सर्ववित् ।
स चेन्द्रश्चैव वायुश्च सोऽश्विनौ स च विद्युतः ॥ १॥

स भवः स च पर्जन्यो महादेवः स चानघः ।
स चन्द्रमाः स चेशानः स सूर्यो वरुणश्च सः ॥ २॥

स कालः सोऽन्तको मृत्युः स यमो रात्र्यहानि च ।
मासार्धमासा ऋतवः सन्ध्ये संवत्सरश्च सः ॥ ३॥

स च धाता विधाता च विश्वात्मा विश्वकर्मकृत् ।
सर्वासां देवतानां च धारयत्यवपुर्वपुः ॥ ४॥

सर्वैर्देवैः स्तुतो देवः सैकधा बहुधा च सः ।
शतधा सहस्रधा चैव तथा शतसहस्रधा ॥ ५॥

ईदृशः स महादेवो भूयश्च भगवानजः ।
न हि सर्वे मया शक्या वक्तुं भगवतो गुणाः ॥ ६॥

सर्वैर्ग्रहैर्गृहीतान्वै सर्वपापसमन्वितान् ।
स मोचयति सुप्रीतः शरण्यः शरणागतान् ॥ ७॥

आयुरारोग्यमैश्वर्यं वित्तं कामांश्च पुष्कलान् ।
स ददाति मनुष्येभ्यः स चैवाक्षिपते पुनः ॥ ८॥

सेन्द्रादिषु च देवेषु तस्य चैश्वर्यमुच्यते ।
स चैव व्याहृते लोके मनुष्याणां शुभाशुभे ॥ ९॥

ऐश्वर्याच्चैव कामानामीश्वरः पुनरुच्यते ।
महेश्वरश्च भूतानां महतामीश्वरश्च सः ॥ १०॥

बहुभिर्बहुधा रूपैर्विश्वं व्याप्नोति वै जगत् ।

अस्य देवस्य यद्वक्त्रं समुद्रे तदतिष्ठत ॥ ११॥

एष चैव श्मशानेषु देवो वसति नित्यशः ।
यजन्त्येनं जनास्तत्र वीरस्थान इतीश्वरम् ॥ १२॥

अस्य दीप्तानि रूपाणि घोराणि च बहूनि च ।
लोके यान्यस्य कुर्वन्ति मनुष्याः प्रवदन्ति च ॥ १३॥

नामधेयानि लोकेषु बहून्यत्र यथार्थवत् ।
निरुच्यन्ते महत्त्वाच्च विभुत्वात्कर्मभिस्तथा ॥ १४॥

वेदे चास्य समाम्नातं शतरुद्रीयमुत्तमम् ।
नाम्ना चानन्तरुद्रेति उपस्थानं महात्मनः ॥ १५॥

स कामानां प्रभुर्देवो ये दिव्या ये च मानुषाः ।
स विभुः स प्रभुर्देवो विश्वं व्याप्नुवते महत् ॥ १६॥

ज्येष्ठं भूतं वदन्त्येनं ब्राह्मणा मुनयस्तथा ।
प्रथमो ह्येष देवानां मुखादस्यानलोऽभवत् ॥ १७॥

सर्वथा यत्पशून्पाति तैश्च यद्रमते पुनः ।
तेषामधिपतिर्यच्च तस्मात्पशुपतिः स्मृतः ॥ १८॥

नित्येन ब्रह्मचर्येण लिङ्गमस्य यदा स्थितम् ।
महयन्ति च लोकाश्च महेश्वर इति स्मृतः ॥ १९॥

ऋषयश्चैव देवाश्च गन्धर्वाप्सरसस्तथा ।
लिङ्गमस्यार्चयन्ति स्म तच्चाप्यूर्ध्वं समास्थितम् ॥ २०॥

पूज्यमाने ततस्तस्मिन्मोदते स महेश्वरः ।
सुखी प्रीतश्च भवति प्रहृष्टश्चैव शङ्करः ॥ २१॥

यदस्य बहुधा रूपं भूतभव्यभवत्स्थितम् ।
स्थावरं जङ्गमं चैव बहुरूपस्ततः स्मृतः ॥ २२॥

एकाक्षो जाज्वलन्नास्ते सर्वतोऽक्षिमयोऽपि वा ।
क्रोधाद्यश्चाविशल्लोकांस्तस्माच्छर्व इति स्मृतः ॥ २३॥

धूम्रं रूपं च यत्तस्य धूर्जटिस्तेन उच्यते ।
विश्वे देवाश्च यत्तस्मिन्विश्वरूपस्ततः स्मृतः ॥ २४॥

तिस्रो देवीर्यदा चैव भजते भुवनेश्वरः ।
द्यामपः पृथिवीं चैव त्र्यम्बकश्च ततः स्मृतः ॥ २५॥

समेधयति यन्नित्यं सर्वार्थान्सर्वकर्मसु ।
शिवमिच्छन्मनुष्याणां तस्मादेष शिवः स्मृतः ॥ २६॥

सहस्राक्षोऽयुताक्षो वा सर्वतोऽक्षिमयोऽपि वा ।
यच्च विश्वं महत्पाति महादेवस्ततः स्मृतः ॥ २७॥

दहत्यूर्ध्वं स्थितो यच्च प्राणोत्पत्तिस्थितश्च यत् ।
स्थितलिङ्गश्च यन्नित्यं तस्मात्स्थाणुरिति स्मृतः ॥ २८॥

विषमस्थः शरीरेषु समश्च प्राणिनामिह ।
स वायुर्विषमस्थेषु प्राणापानशरीरिषु ॥ २९॥

पूजयेद्विग्रहं यस्तु लिङ्गं वापि समर्चयेत् ।
लिङ्गं पूजयिता नित्यं महतीं श्रियमश्नुते ॥ ३०॥

ऊरुभ्यामर्धमाग्नेयं सोमार्धं च शिवा तनुः ।
आत्मनोऽर्धं च तस्याग्निः सोमोऽर्धं पुनरुच्यते ॥ ३१॥

तैजसी महती दीप्ता देवेभ्यश्च शिवा तनुः ।
भास्वती मानुषेष्वस्य तनुर्घोराग्निरुच्यते ॥ ३२॥

ब्रह्मचर्यं चरत्येष शिवा यास्य तनुस्तया ।
यास्य घोरतरा मूर्तिः सर्वानत्ति तयेश्वरः ॥ ३३॥

यन्निर्दहति यत्तीक्ष्णो यदुग्रो यत्प्रतापवान् ।
मांसशोणितमज्जादो यत्ततो रुद्र उच्यते ॥ ३४॥

एष देवो महादेवो योऽसौ पार्थ तवाग्रतः ।
सङ्ग्रामे शात्रवान्निघ्नंस्त्वया दृष्टः पिनाकधृक् ॥ ३५॥

एष वै भगवान्देवः सङ्ग्रामे याति तेऽग्रतः ।
येन दत्तानि तेऽस्त्राणि यैस्त्वया दानवा हताः ॥ ३६॥

धन्यं यशस्यमायुष्यं पुण्यं वेदैश्च संज्ञितम् ।
देवदेवस्य ते पार्थ व्याख्यातं शतरुद्रियम् ॥ ३७॥

सर्वार्थसाधकं पुण्यं सर्वकिल्बिषनाशनम् ।
सर्वपापप्रशमनं सर्वदुःखभयापहम् ॥ ३८॥

चतुर्विधमिदं स्तोत्रं यः शृणोति नरः सदा ।
विजित्य सर्वाञ्शत्रून्स रुद्रलोके महीयते ॥ ३९॥

चरितं महात्मनो दिव्यं साङ्ग्रामिकमिदं शुभम् ।
पठन्वै शतरुद्रीयं शृण्वंश्च सततोत्थितः ॥ ४०॥

भक्तो विश्वेश्वरं देवं मानुषेषु तु यः सदा ।
वरान्स कामाँल्लभते प्रसन्ने त्र्यम्बके नरः ॥ ४१॥

इति महाभारते द्रोणपर्वणि व्याआसकृतं शतरुद्रीयं सम्पूर्णम् ।

महाभारत । द्रोणपर्व ।

mahAbhArata . droNaparva .

Notes:

The shlokas have been renumbered since
various publications differ about the
relevant chapter number and shloka numbers.

Proofread by PSA Easwaran

---

*Vyasakritam Shatarudriyam*

pdf was typeset on August 4, 2026

Please send corrections to *sanskrit@cheerful.com*